ज्ञानवाप्याः समुत्पत्तिं कथ्यमानां मयाऽधुना । अनादिसिद्धे संसारे पुरा देवयुगे मुने ! । प्राप्तः कुतश्चिदीशानश्चरन् स्वैरमितस्ततः । न वर्षन्ति यदाऽभ्राणि न प्रावर्त्तन्त निम्नगाः । जलाभिलाषो न यदा स्नानपानादिकर्म्मणि । क्षीरस्वादूदयोरेव यदासीज्जलदर्शनम् । पृथिव्यां नरसञ्चारे वर्त्तमाने क्वचित् क्वचित् । निर्वाणकमलक्षेत्रं श्रीमदानन्दकाननम् । महाश्मशानं सर्व्वेषां वीजानां परमूषरम् । महाशयनसुप्तानां जन्तूनां प्रतिबोधकम् । संसारसागरावर्त्तपतज्जन्तुतरण्डकम् । यातायातातिसंखिन्नजन्तुविश्राममण्डपम् । अनेकजन्मगुणितकर्म्मसूत्रच्छिदक्षुरम् । सच्चिदानन्दनिलयं परं ब्रह्म रसायनम् । सुखसन्तानजनकं मोक्षसाधनसिद्धिदम् । प्रविश्य क्षेत्रमेतत् स ईशानो जटिलस्तदा । लसत्त्रिशूलविमलरश्मिजालसमाकुलः । आलुलोके महालिङ्गं वैकुण्ठपरमेष्ठिनोः । महाहमहमिकायां प्रादुरास यदादितः । ज्योतिर्म्मयीभिर्म्मालाभिः परितः परिवेष्टितम् । वृन्दैर्वृन्दारकर्षीणां गणानाञ्च निरन्तरम् । सिद्धानां योगिनां स्तोमैरर्च्च्यमानं निरन्तरम् । गीयमानञ्च गन्धर्व्वैः स्तूयमानञ्च चारणैः । अङ्गहारैरप्सरोभिः सेव्यमानमनेकधा । नीराज्यमानं सततं नागीभिर्म्मणिदीपकैः । विद्याधरीकिन्नरीभिस्त्रिकालं कृतमण्डनम् । अमरीचमरीराजिवीज्यमानमितस्ततः । तस्येशानस्य तल्लिङ्गं दृष्ट्वेच्छा ह्यभवत्तदा । स्नपयामि महालिङ्गं कलसैः शीतलैर्जलैः । च खान च त्रिशूलेन दक्षिणाशोपकण्ठतः । कुण्डं प्रचण्डवेगेन रुद्रो रुद्रवपुर्धरः । पृथिव्यावरणाम्भांसि निष्क्रान्तानि तदा मुने ! । भूप्रमाणाद्दशगुणैर्यैरियं वसुधा वृता । तैर्जलैः स्नपयाञ्चक्रे दुष्प्रेक्ष्यैरन्यदेहिभिः । तुषारैर्जाड्यविधुरैर्जपकौघहारिभिः । सन्मनोभिरिवात्यच्छैरनच्छैर्व्योमवर्त्मवत् । ज्योत्स्नावदुज्ज्वलच्छायैः पावनैः शम्भुनामवत् । पीयूषवत् स्वादुतरैः सुखस्पर्शैर्गवाङ्गवत् । निष्पापधीरकुक्षीवैस्तरलैः पापिशर्म्मवत् । विजिताब्जमहागन्धैः पाटलामोदमोदिभिः । अदृष्टपूर्व्वलोकानां मनोनयनहारिभिः । अज्ञानतापसन्तप्तप्राणिप्राणैकरक्षिभिः । पञ्चामृतानां कलसैः स्नपनातिफलप्रदैः । अष्टोपस्पर्शिहृदयलिङ्गत्रितयहेतुभिः । अज्ञानतिमिराकीर्णैर्ज्ञानदाननिदानकैः । विश्वभर्त्तुरुमास्पर्शसुखातिसुखकारिभिः ।

सहस्रभृत्यसञ्जातमहाशुद्धिविधायिभिः । सहस्रधारैः कलसैः स ईशानो घटोद्भव ! । सहस्रकृत्वः स्नपयामास संहृष्टमानसः । ततः प्रसन्नो भगवान् विश्वात्मा विश्वलोचनः । तमुवाच तदेशानं रुद्रं रुद्रवपुर्धरम् । तव प्रसन्नोऽस्मीशान ! कर्म्मणानेन सुव्रत ! । गुरुणानन्यपूर्व्वेण ममातिप्रीतिकारिणा । ततस्त्वं जटिलेशान वरं ब्रूहि तपोधन ! । अदेयं न तवास्त्यत्र महोद्यमपरायण । ईशान उवाच । यदि प्रसन्नो देवेश ! वरयोग्योऽस्म्यहं यदि । तदेतदतुलं तीर्थं तव नाम्नास्तु शङ्कर । श्रीविश्वेश्वर उवाच । त्रैलोक्ये यानि तीर्थानि भूर्भुवःस्वःस्थितान्यपि । तेभ्योऽखिलेभ्यस्तीर्थेभ्यः शिवतीर्थमिदं परम् । शिवो ज्ञानमिति ब्रूयुः शिवशब्दार्थचिन्तकाः । तच्च ज्ञानं द्रवीभूतमिह मे महिमोदयात् । अतो ज्ञानोदनामैतत्तीर्थं त्रैलोक्यविश्रुतम् । अस्य दर्शनमात्रेण सर्व्वपापैः प्रमुच्यते । ज्ञानोदतीर्थसंस्पर्शादश्वमेधफलं लभेत् । स्पर्शनाचमनाभ्याञ्च राजसूयाश्वमेधयोः । फल्गुतीर्थे नरः स्नात्वा सन्तर्प्य च पितामहान् । यत् फलं समवाप्नोति तदत्र श्राद्धकर्म्मणा । गुरुपुष्यसिताष्टम्यां व्यतीपातो यदा भवेत् । तदात्र श्राद्धकरणाद्गयाकोटिफलं भवेत् । यत् फलं समवाप्नोति पितॄन् सन्तर्प्य पुष्करे । तत्फलं कोटिगुणितं ज्ञानतीर्थे तिलोदकैः । सन्निहत्यां कुरुक्षेत्रे तमोग्रस्ते विवस्वति । यत्फलं पिण्डदानेन तज्ज्ञानोदे दिने दिने । पिण्डनिर्वपनं येषां ज्ञानतीर्थे सुतैः कृतम् । मोदन्ते शिवलोके ते यावदाभूतसंप्लवम् । अष्टम्याञ्च चतुर्द्दश्यामुपवासी नरोत्तमः । प्रातः स्नात्वाऽथ पीत्वाम्बस्त्वन्तर्लिङ्गमयो भवेत् । एकादश्यामुपोष्याथ प्राश्नेद्यश्चुलुकत्रयम् । हृदये तस्य जायन्ते त्रीणि लिङ्गान्यसंशयम् । ईशानतीर्थे यः स्नायाद्विशेषात् सोमवासरे । सन्तर्प्य देवर्षिपितॄन् दत्त्वा दानं स्वशक्तितः । ततः समभ्यर्च्य श्रीलिङ्गं महासम्भारविस्तरैः । तत्रापि दत्त्वा नानार्थान् कृतकृत्यो भवेन्नरः । उपास्य सन्ध्यां ज्ञानोदे यत् पापं काललोपजम् । क्षणेन तदपाकृत्य ज्ञानवान् जायते नरः । शिवतीर्थमिदं प्रोक्तं ज्ञानतीर्थमिदं शुभम् । तारकाख्यमिदं तीर्थं मोक्षतीर्थमिदं स्मृतम् । स्मरणादपि पापौघो ज्ञानोदे क्षीयते ध्रुवम् । दर्शनात् स्पर्शनात् स्नानात् पानाद्धर्म्मादिसम्भवः । डाकिनीशाकिनीभूतप्रेतवेतालराक्षसाः । ग्रहकुष्माण्डझोटाङ्गाः